श्री गौरीगिरीश कल्याण स्तवः

श्री गौरीगिरीश कल्याण स्तवः

(श्रीशृंगगिरौ - श्रीभवानीमलहानिकरेश्वरकल्याणोत्सवे)
चंद्रार्धप्रविभासिमस्तकतटौ तंद्राविहीनौ सदा
भक्तौघप्रतिपालने निजतनुच्छायाजितार्कायुतौ |
शृंगाद्रिस्थविवाहमंडपगतौ कारुण्यवारान्निधी
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ||1||

अन्योन्यार्चनतत्परौ मधुरवाक्सतोषितान्योन्यकौ
चंद्रार्धांचितशेखरौ प्रणमतामिष्टार्थदौ सत्वरं |
शृंगाहिस्थविवाहमंडपगतौ शृंगारजन्मावनी
कल्पाणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ||2||

कामापत्तिविभूतिकारणदृशौ सोमार्धभूषोज्ज्वलौ
सामाम्नायसुगीयमानचरितौ रामार्चितांघ्रिद्वयौ |
शृंगाद्रिस्थविवाहमंडपगतौ माणिक्यभूषान्वितौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ||3||

सौंदर्येण परस्परं प्रमुदितावन्योन्यचित्तस्थितौ
राकाचंद्रसमानवक्त्रकमलौ पाकाब्जकालंकृतौ |
शृंगाद्रिस्थविवाहमंडपगतौ तुंगातटावासिनौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ||4||

सिंहोक्षाग्र्यगती महोन्नतपदं संप्रापयंतौ नता-
नंहोराशिनिवारणैकनिपुणौ ब्रह्मेंद्रविष्ण्वर्चितौ |
शृंगाद्रिस्थविवाहमंडपगतौ गांगेयभूषोज्ज्वलौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ||5||

कस्तूरीघनसारचर्चिततनू प्रस्तूयमानौ सुरै-
रस्तूक्त्या प्रणतेष्टपूरणकरौ वस्तूपलब्धिप्रदौ |
शृंगाद्रिस्थविवाहमंडपगतावंगावधूतेंदुभौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ||6||

वाणीनिर्जितहंसकोकिलरवौ पाणीकृतांभोरुहौ
वेणीकेशविनिर्जिताहिचपलौ क्षोणीसमानक्षमौ |
शृंगाद्रिस्थविवाहमंडपगतौ तुंगेष्टजालप्रदौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ||7||

दंभाहंकृतिदोषशून्यपुरुषैः संभावनीयौ सदा
जंभारातिमुखामरेंद्रविनुतौ कुंभात्मजाद्यर्चितौ |
शृंगाद्रिस्थविवाहमंडपगतौ वाग्दानदीक्षाधरौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ||8||

शापानुग्रहशक्तिदाननिपुणौ तापापनोदक्षमौ
सोपानक्रमतोऽधिकारिभिरनुप्राप्यौ क्षमासागरौ |
शृंगाद्रिस्थविवाहमंडपगतौ लावण्यपाथोनिधी
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ||9||

शोणांभोरुहतुल्यपादयुगलौ बाणार्चनातोषितौ
वीणाधृन्मुनिगीयमानविभवौ बालारुणाभांबरौ |
शृंगाद्रिस्थविवाहमंडपगतौ तुल्याधिकैर्वर्जितौ
कल्याणं तनुतां समस्तजगतां गौरागिरीशौ मुदा ||10||

इति शृंगेरि श्रीजगद्गुरु श्रीसच्चिदानंदशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचितः श्रीगौरीगिरीशकल्याणस्तवः संपूर्णः |